उ० होवाचैतदमृतमभयमेतद्ब्रह्मेति तद्यद्यप्यस्मिन् सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छति॥१॥

---

भा० आचार्य्यस्तु ते गतिं वक्तेति गतिमात्रं वक्तेत्यवोचन् भविष्यद्विषयापरिज्ञानस्यागमीनां । नैष दोषः । सुखाकाशस्यैवाक्षिणि दृश्यत इति द्रष्टुरनुवादात् । एष आत्मा प्राणिनामिति होवाच एवमुक्तवानेतद्यदेवात्मतत्त्वमवोचाम । एतदमृतममरणधर्म्यविनाश्यत एवाभयं यस्य हि विनाशाशङ्का तस्य भयोपपत्तिस्तदभावादभयमत एवैतद्ब्रह्म बृहदनन्तमिति । किञ्चास्य ब्रह्मणोऽक्षिपुरुषस्य माहात्म्यं तत्तत्र पुरुषस्य स्थानेऽक्षिणि यद्यपि अस्मिन् सर्पिर्वोदकं वा सिञ्चन्ति वर्त्मनी एव गच्छति पक्ष्मावेव

---

आ० छित्वे विशेषणान्तरमाह । शान्तैरिति ॥ तेषां निष्कृतचक्षुष्ट्वे हेतुमाह। विवेकिभिरिति ॥ पुरुषोऽक्षिणि दृश्यत इत्यत्र बृहदारण्यकश्रुतिं प्रमाणयति। चक्षुष इति॥ आचार्य्येणापूर्व्वविद्योपदेशादमीषामुक्तिर्मिथ्या प्राप्नोति शङ्कते। नन्विति॥ अभिवचनस्य गत्यन्तरमाह । भविष्यदिति॥ नामीषामुक्तिर्मृषा नापि तेषां भविष्यद्विषयाज्ञानमिति दूषयति। नैष दोष इति॥ सत्सुखगुणकमाकाशमुपास्यमभिभिरुपदिष्टं तस्यैव कारणब्रह्मणो द्रष्टा रूपस्याक्षिणि दृश्यते इत्यनुवादो गतिव्याख्यानाचार्य्यैव क्रियते तस्मान्न दोषद्वयमित्यर्थः॥ अक्षिणि दृश्यत इति प्रयोगादाचार्य्यैव छायात्मा विवक्षित इत्याशङ्क्याह। एष इति॥

इतश्च नायं पुरुषश्छायात्मेत्यनन्तरवाक्यमवतार्य्य व्याकरोति। एतदित्यादिना॥ इतिशब्दो यथोक्तगुणगणैरुपास्यः पुरुषो न छायात्मा भवितुमर्हतीत्यर्थः। अमृतत्वाच्च नायं छायात्मे-

Digitized by Google

उ॰ चर्य्येणानुविन्दन्ति तेषामेवैष ब्रह्मलोकस्तेषाꣳ सर्वेषु लोकेषु कामचारो भवति ॥ ४ ॥ ५ ॥

---

भा॰ तान्यपि आकारविशेषतोऽनृतं। स्वतः सन्मात्ररूपतया सत्यं। प्राक्सदात्मप्रतिबोधात्तद्विषयेऽपि सर्व्वं सत्यमेव स्वप्नदृश्या इवेति न कश्चिद्विरोधः। तस्मान्मानसा एव ब्राह्मलौकिका अरण्यादयः सङ्कल्पजाश्च पित्रादयः कामाः। बाह्यविषयभोगवदशुद्धिरहितत्वाच्छुद्धसत्त्वसङ्कल्पजन्या इति निरतिशयसुखाः सत्याश्चेश्वराणां भवन्तीत्यर्थः। सत्सत्यात्मप्रतिबोधेऽपि रज्ज्वामिव कल्पिताः सर्पादयः सदात्मस्वरूपमेव प्रतिपद्यन्त इति सदात्मना सत्या एव भवन्ति ॥ ५ ॥

---

आ॰ दित्याशङ्क्याह। तान्यपीति॥ कथं तर्हि तेषु सत्यपदं प्रयुक्तमित्याशङ्क्याह। स्वत इति॥ तर्हि तत्सत्त्वमित्येतावत्प्रयोक्तव्यं किमिति नीलरूपादीनेव सत्यमित्युक्तं तत्राह। प्रागिति॥ प्रकृतमुपसंहरति। तस्मादिति॥ प्रथमपक्षवद्द्वितीयपक्षे दोषाभावादिति यावत्। यद्यैहिकविषयवद्ब्राह्मलौकिका अपि विषया विचार्य्यमाणाः सत्यास्तर्हि कस्तत्र विशेषो येनैतत्परित्यागेन तत्कामिनां विद्याविधानं तत्राह। बाह्येति॥ अन्या ब्रह्मलोके विषया इति शेषः॥ प्रकृतायाः फलश्रुतेरित्यध्याहारः। ननु तेषामविद्यावस्थायामर्थक्रियाकारित्वरूपसत्त्वसम्भवेऽपि कुतो विद्यावस्थायां सत्त्वमित्याशङ्क्याह। सत्सत्येति॥ यथा रज्ज्वां कल्पितसर्पादयो रज्जुतत्त्वबोधे तदात्मतामेवापाद्यन्ते विवेचनात्। तथा सर्व्वेऽपि विषया विद्यावस्थायामन्वयव्यतिरेकाभ्यां परिहारायासन्मात्रत्वमेव प्राप्नुवन्तीति तस्यात्मन-विवर्त्तमित्यर्थः॥ ५॥

उ॰ तदेष श्लोकः शतञ्चैका च हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिःसृतैका । तयोर्द्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥ ६ ॥ ६ ॥

---

भा॰ सौरेव तेषां हृदे एव निरुद्धाः सन्तो मूर्द्धन्यया नाड्या नोत्क्रामन्त एवेत्यर्थः ॥ ५ ॥

विष्वङ्ङन्या इति श्लोकादेतस्मिन्नर्थे एष श्लोको मन्त्रो भवति । शतञ्चैका चैकोत्तरशतं नाड्यो हृदयस्य मांसपिण्डभूतस्य सम्बन्धिन्यः प्रधानतो भवन्ति । तासामन्या-हृदे नाडीनां तासामेका मूर्द्धानमभिनिःसृता विनिर्गता तयोर्द्धमायन् गच्छन्नमृतत्वममृतभावमेति विष्वङ्नानागतयो विष्वग्विसर्पिण्य ऊर्द्धगाश्चान्या नाड्यो भवन्ति संसारगमनद्वारभूता न त्वमृतत्वाय किं तर्ह्युत्क्रमणे एवोत्क्रान्त्यर्थमेव भवन्तीत्यर्थः । द्विरभ्यासः प्रकरणसमाप्त्यर्थः ॥ ६ ॥

---

आ॰ विदुषस्त्वज्ञदेहस्यादित्यप्राप्तावत्यन्तवैलक्षण्यं दर्शयितुमनन्तरवाक्यमादत्ते किं स्यादित्यत आह । अत इति ॥ अविदुषामपि तर्हि प्राप्तानामादित्यं ततो निरुद्धानां पुनर्ब्रह्मलोकप्राप्तिरित्याशङ्क्याह । सौरेवेति ॥ ५ ॥

देहे निरुद्धानां मूर्द्धन्यया नाड्या नोत्क्रमणमविदुषामित्यत्र लिङ्गं दर्शयति । विष्वङ्ङिति ॥ यथोक्तार्थो नाडीविभागश्लोकः प्रधानान्त इति विशेषणतात्पर्यमाह । तासामन्यादिति ॥ प्रकरणं नाडीविषयं हृदयविद्याविषयं वा ॥ ६ ॥

# छान्दोग्योपनिषत्सूचीपत्रं ॥

## अथ प्रथमोऽध्यायः ।


| | खण्ड | पृष्ठावधि | पृष्ठापर्य्यन्त |
|---|---|---|---|
| ॐकारस्य रसतमत्वाप्तिसमृद्धिगुणानामुक्तिः | १ | ९ | २४ |
| प्राणदृष्ट्या ॐकारोपासनं............. | २ | २५ | ३९ |
| आदित्यदृष्ट्या प्राणादिदृष्ट्या च उद्गीथस्वरोपासनं.................. | ३ | ३९ | ४९ |
| स्वरशब्दितमोङ्कारोपासनं............ | ४ | ५० | ५३ |
| वागादीन् मुख्यप्राणञ्च रश्मीन् आदित्यञ्च उद्गीथदृष्ट्या अभेदोपासननिन्दापूर्व्वकं तयोः पुनर्भेदोपासनं | ५।६।७ | ५४ | ६९ |
| शिलकदाल्भ्यजैवलिसंवादः.......... | ८।९ | ७० | ७९ |
| दुर्भिक्षकाले उषस्तेर्ग्रामान्तरगमनं हस्तिपालोच्छिष्टभोजनादिप्रस्तावपूर्व्वकराजदर्शनादिऋत्विक् संवादः | १० | ८० | ८५ |
| राजोषस्तिसंवादपूर्व्वकमार्त्विज्यप्रस्तावेन देवताख्यानं.................. | ११ | ८६ | ९० |
| कुक्कुरैरुद्गीथोपासनोपदेशः.......... | १२ | ९० | ९४ |
| भक्त्यवयवोपासनं.................... | १३ | ९५ | ९७ |


## अथ द्वितीयोऽध्यायः ।


| | खण्ड | पृष्ठावधि | पृष्ठापर्य्यन्त |
|---|---|---|---|
| साधुदृष्ट्या समस्तसामोपासना......... | १ | ९९ | १०१ |
| लोकदृष्ट्या हिङ्कारः प्रस्तावः उद्गीथः प्रतिहारः निधनमिति पञ्चविधसामोपासना | २ | १०२ | १०५ |
| वृष्टिदृष्ट्या पञ्चविधसामोपासना........ | ३ | १०६ | १०६ |
| अब्दृष्ट्या पञ्चविधसामोपासना........ | ४ | १०७ | १०७ |


Digitized by Google

| | खण्ड | पृष्ठावधि | पृष्ठापर्य्यन्त |
|---|---|---|---|
| सङ्कल्पो मनसो भूयानिति | ४ | ४८४ | ४८८ |
| चित्तं सङ्कल्पाद्भूय इति | ५ | ४८८ | ४९० |
| ध्यानं चित्ताद्भूय इति | ६ | ४९० | ४९३ |
| विज्ञानं ध्यानाद्भूय इति | ७ | ४९३ | ४९४ |
| बलं विज्ञानाद्भूय इति | ८ | ४९४ | ४९४ |
| अन्नं बलाद्भूय इति | ९ | ४९६ | ४९७ |
| आपोऽन्नाद्भूय इति | १० | ४९८ | ४९९ |
| तेजोऽद्भ्यो भूय इति | ११ | ४९९ | ५०० |
| आकाशस्तेजसो भूयानिति | १२ | ५०१ | ५०२ |
| स्मरमाकाशाद्भूय इति | १३ | ५०२ | ५०३ |
| आशा स्मराद्भूयसीति | १४ | ५०४ | ५०४ |
| प्राण आशाया भूयानिति | १५ | ५०५ | ५१० |
| सत्यज्ञानोपदेशः | १६ | ५१० | ५११ |
| विज्ञानोपदेशः | १७ | ५११ | ५१३ |
| मतिज्ञानोपदेशः | १८ | ५१४ | ५१४ |
| श्रद्धाज्ञानोपदेशः | १९ | ५१४ | ५१४ |
| निष्ठाज्ञानोपदेशः | २० | ५१४ | ५१४ |
| कृतिज्ञानोपदेशः | २१ | ५१५ | ५१५ |
| सुखज्ञानोपदेशः | २२ | ५१५ | ५१५ |
| भूमाज्ञानोपदेशः | २३ | ५१६ | ५१६ |
| कस्मिन् प्रतिष्ठितत्वोपदेशः | २४ | ५१७ | ५२१ |
| सर्व्वञ्च स एवेत्युपदेशः | २५ | ५२१ | ५२४ |
| एवंविदः फलोपदेशः | २६ | ५२४ | ५२७ |


अष्टमाध्यायः ।


| | | | |
|---|---|---|---|
| दहरपुण्डरीके ब्रह्मोपासनं | १ | ५२८ | ५४० |
| दहरब्रह्मोपासनफलं | २ | ५४१ | ५४२ |
| असत्यापिहितसत्योपासनं नामाक्षरोपासनञ्च | ३ | ५४३ | ५४९ |
| सेतुरूपात्मोपासना | ४ | ५५० | ५५३ |


Digitized by Google

